# Shri Mahadevagadyam

# श्रीमहादेवगद्यम् २

## Document Information

Text title : Shri Mahadevagadyam 02 53

File name : mahAdevagadyam2.itx

Category : shiva, gadyam

Location : doc_shiva

Proofread by : Aruna Narayanan

Description/comments : From stotrArNavaH 02-53

Latest update : July 25, 2021

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 25, 2021

*sanskritdocuments.org*

# श्रीमहादेवगद्यम् २

ॐ जय जय महादेव महाकाल महाकालास्पद महाकालगल
नाकौकःप्रत्यनीकनाशकर नारायणप्रिय नारदोपगीयमानशुभचरित
नागेन्द्रकृत्तिनिर्वर्तितोत्तरीय त्रिभुवनभवन
तिमिरहरणविशददशशतकरनिकरविकसिततरुणतरसरसिरुहदलसदृशनयन
त्रिनयन त्रिवेदमय त्रिशूलधर त्रिपुरहर
त्रिपथगाम्बुचुम्बितजटाजूटकोटीरभार त्र्यम्बक
अम्बिकानितम्बबिम्बस्पर्शलम्पटकराम्बुज
मण्डलीभूताण्डजपतिकुण्डलमण्डितगण्डस्थल
पुण्डरीकचर्मखण्डवसन प्रचण्डमेरुकोदण्डप्रस्फुरणप्रहसित
प्रलयकालताण्डवप्रसारितदोर्दण्ड
सहस्रमण्डलाभीरक ब्रह्माण्डखण्ड पाण्डुराङ्ग चण्डीश्वर मृड
अतुलबलदशलपनपृथुलभुजतरुवनचलितरजत-
गिरिशिखरसदृशककुदुरुशिततरवरवृषभललितगतिनिरत
निशितपरशुधार
शिशिरकरशकलशेखरशशिकाशसङ्काशभस्मस्निग्धसर्वाङ्गशरीर
अनिशशिशुशरवणभव तात विश्व विश्वेश्वर
शर्व शाश्वत कुशेशाया सनसंस्तूयमानयशः,
अक्षजाशुशिक्षणिभक्षितपञ्चबाणशरीर
दक्षयज्ञनाशनभगाक्षहरण दक्षिणार्ह
अहिमकरहुतभुखिमकिरणधरणीगगनपवनपतिसलिलात्मक
सार्वभौम सकललोकपालमौलिमालालङ्कृतपादपङ्कजपराग
युगचतुष्टयप्रतिष्ठितजगत्त्रय कपटनाटकनटनपटुचाटुकर
?? पटुतरघनघटाक्रीडासक्त त्रयीविष्टपाय (अयः-शरणं)
सुरमणिमकुटकोटीररत्नसङ्घटितहाटकपादपीठ
कवाटवक्षःस्थल स्वकटितटगलदलित(गलित)

मदजलमत्तमधुकरकुलकलरवगुणित (करि)
दलविदलनसरभसमृगपतिकररुहविवरलग्नस्थूलमुक्ताफलकुसुमावलीसुन्दर
श्रीमत्कैलासनिवास वासवारिनारीवैधव्यकर
विबुधयुगपतिजनानन्दकर(?) प्रणतदीनार्तिनाशन वरद वामदेव
समस्त लोकैकनाथ शिव शिव नमस्ते नमस्ते नमः ।

अपगतपापाय नमः कपिलजटामण्डलेन्दुखण्डाय नमः ।
द्विपचर्मपटाय नमस्त्रिपुरमखघ्नाय देवदेवाय नमः ।

॥ इति श्रीमहादेवगद्यं सम्पूर्णम् ॥

Proofread by Aruna Narayanan

*Shri Mahadevagadyam*

pdf was typeset on July 25, 2021

Please send corrections to *sanskrit@cheerful.com*